## सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः । (१२०/८६०)

सुप्रातादयो[1] बहुव्रीहिसमासा अच्प्रत्ययान्ता निपात्यन्ते । अन्यदपि च टिलोपादिकं निपातनादेव सिद्धम् । शोभनं प्रातर् अस्य सुप्रातः (शौ. १९.८.३) । शोभनं श्वोऽस्य सुश्वः । शोभनं दिवा अस्य सुदिवः (ऋ.१०.३.५) । शारेरिव कुक्षिरस्य शारिकुक्षः । चतस्रोऽश्रयोऽस्य चतुरश्रः । एण्या इव पादौ अस्य एणीपदः । अजस्येव पादावस्य अजपदः । [2]प्रोष्ठो गोः, तस्येव पादावस्य प्रोष्ठपदः (तै.सं. ४.४.१०.७) ॥

## नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्याम् । (१२१/८६१)

नञ् दुस् सु इत्येतेभ्यः परौ यौ हलिसक्थिशब्दौ तदन्ताद् बहुव्रीहेरन्यतरस्यामच् प्रत्ययो भवति समासान्तः । अविद्यमाना हलिरस्य अहलः, अहलिः । दुर्हलः, [3]दुर्हलिः । सुहलः, सुहलिः । अविद्यमानं सक्थि अस्य असक्थः, असक्थिः । दुःसक्थः, दुःसक्थिः । सुसक्थः, सुसक्थिः । हलिशक्त्योः इति केचित् पठन्ति । अविद्यमाना शक्तिः अस्य अशक्तः, अशक्तिः । [4]विरूपा शक्तिः अस्य दुःशक्तः, दुःशक्तिः । शोभना शक्तिः अस्य सुशक्तः, सुशक्तिः ॥

## नित्यमसिच् प्रजामेधयोः । (१२२/८६२)

नञ्दुस्सुभ्यः इत्येव । नञ् दुस् सु इत्येतेभ्यः परौ यौ प्रजामेधाशब्दौ तदन्ताद् बहुव्रीहेः नित्यमसिच् प्रत्ययो भवति समासान्तः । अविद्यमाना प्रजा अस्य अप्रजाः । दुष्प्रजाः । सुप्रजाः । अविद्यमाना मेधा यस्य अमेधाः । दुर्मेधाः । सुमेधाः । नित्यग्रहणं किम्, यावता पूर्वसूत्रेऽन्यतरस्यांग्रहणं [5]नैव स्वर्यते ? एवं तर्हि नित्यग्रहणादन्यत्रापि [6]भवति इति सूच्यते ।

श्रोत्रियस्येव ते राजन् [7]मन्दकस्याल्पमेधसः ।
अनुवाकहता बुद्धिर्नैषा तत्त्वार्थदर्शिनी ॥

## बहुप्रजाश्छन्दसि । (१२३/३६०७)

बहुप्रजाः इति छन्दसि निपात्यसे । 'बहुप्रजा [8]निर्ऋतिमाविवेश' (ऋ. १. १६४. ३२) । छन्दसि इति किम् ? बहुप्रजो ब्राह्मणः ॥

## धर्मादनिच् केवलात् । (१२४/८६३)

[9]केवलाद् यो धर्मशब्दः तदन्ताद् बहुव्रीहेः अनिच् प्रत्ययो भवति समासान्तः । [10]कल्याणो धर्मोऽस्य कल्याणधर्मा । प्रियधर्मा[11] । केवलात् इति किम् ? परमः स्वो धर्मः अस्य परमस्वधर्मः । यद्येवं त्रिपदे बहुव्रीहौ प्राप्नोति, परमः स्वो धर्मः अस्य इति ? एवं तर्हि केवलात् इति पूर्वपदं [12]निर्दिश्यते, [13]केवलात् पदाद् यो धर्मशब्दो न [14]पदसमुदायात्, तदन्ताद् बहुव्रीहेः प्रत्ययः[15] ॥

---

1. शब्दाः बहुव्रीहौ समासे क. 2. प्रोष्टस्य इव पादौ यस्य फ. 3. दुर्हलिः – सुशक्तिः नास्ति फ. 4. दुर्गता क. 5 एव नास्ति फ. 6. भविष्यति क. ब. 7. भक्षकस्य ड. 8. निर्वृत्तिम् ड. 9. केवलयो यो धर्मशब्दः असमस्तः ब. क. ड. 10. कल्याणो धर्मोऽस्य नास्ति ग. फ. 11. मनुष्यधर्मा इत्यधिकम् क. 12. विशिष्यते ब. 13. पूर्वपदात् परो ब. क. ड. ह. 14. पद नास्ति क, न च समुदायात् ह. 15. इति इत्यधिकम् ब. फ. ह.